(अस्याः पर्य्यायाः यथा ।
"स्पृक्कासृक् ब्राह्मणी देवी मरुन्माला लता लघुः ।
समुद्रान्ता वधूः कोटिवर्षा लङ्कोपिकेत्यपि" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
गुणाश्चास्याः स्पृक्काशब्दे ज्ञेयाः ॥)

कोटिशः, पुं, (कोट्या अग्रेण श्यति नाशयति चूर्णीकरोतीत्यर्थः । कोटि+शो+कः ।) लोष्ट-भङ्गसाधनमुद्गरः ॥ इति भरतः ॥ मइ इति ख्यात इति केचित् । तत्पर्य्यायः । लोष्टभेदनः २ । इत्यमरः । २ । ९ । १२ ॥ लोष्टघ्नः ३ कोटीशः ४ । इति रत्नकोषः ॥ लोष्टभेदी ५ चूर्णदण्डः ६ लोष्टभङ्गार्थमुद्गरः ७ । इति शब्दरत्नावली ॥ लोष्टघ्नः ८ । इति जटाधरः ॥ (कोटिरस्यास्तीति लोमादित्वात् शः । कोटियुक्ते, त्रि ॥ वासुकीवंशीयनागविशेषः । यथा, महाभारते । १ । ५७ । ५ ।
"कोटिशो मानसः पूर्णः शलः पालो हलीमकः" ॥)

कोटिशः, [स्] व्य, (कोटि+वारार्थे चशस् ।) कोटिः कोटिः । इति व्याकरणम् ।
(यथा, रघौ । २ । ४९ ।
"गाः कोटिशः स्पर्शयता घटोध्नीः" ॥)

कोटी, स्त्री, (कुट+"सर्व्वधातुभ्य इन्" । उणां ४ । ११७ । इतीन् ततो वा ङीप् ।) खड्गादेरग्रभागः । इत्यमरटीका ॥ एकाशाकम् । इति शब्दरत्नावली । कोटिसङ्ख्या । इति लिङ्गादिसंग्रहटीकायां भरतः ॥ (यथा, महाभारते । ७ । जयद्रथवधपर्व्वणि । ८७ । ३० ।
"प्रतोदैश्चापकोटीभिर्हुङ्कारैः साधु वाहितैः ।
कशापार्ष्णिभिघातैश्च वाग्भिरुग्राभिरेव च" ॥)

कोटीरः, पुं, (कोटीभिः ईरयति प्रेरयति । कोटी+ईर्+णिच् अच् ।) जटा । इति त्रिकाण्डशेषः ॥ (यथा, आनन्दलहर्य्याम् । ३० ।
"किरीटं वैरञ्चं परिहर पुरः कैटभभिदः
कठोरे कोटीरे स्खलसि जहि जम्भारिमुकुटम्" ॥)
किरीटम् । इति हेमचन्द्रः ॥

कोटीवर्षं, स्त्री, (कोटीसङ्ख्यकानि बाणाद्यस्त्राणि विपक्षान् प्रति वर्षन्ति अत्र । कोटी+वृष्+अप् ।) बाणपुरम् । इति त्रिकाण्डशेषः ॥ (इदानीं देवीकोट इत्याख्ययाख्यायते ॥)

कोटीवर्षा, स्त्री, (कोटीं कोटीर्वा वर्षति माधुर्य्यादिस्वादम् । वृष्+अच्+टाप् ।) कोटिवर्षा । इति शब्दरत्नावली । पिड़िङ्ग शाक इति भाषा ॥

कोटीशः, पुं, (कोटीं लोष्टादीनां कोटीसंख्यां श्यति चूर्णयतीति । कोटी+शो+कः । ) कोटिशः । इत्यमरटीकायां भरतः ॥

कोट्टं, स्त्री, (कुट्टाते विपक्षोऽस्मिन् अत्र वा । कुट्ट+अधिकरणे घञ् । निपातनात् गुणः ।) दुर्गम् । इति हेमचन्द्रः । केल्ला गड़ इत्यादि भाषा ॥

कोट्टः, पुं, (कुट्टान्ते शत्रवोऽत्र । कुट्ट छेदे+घञ् । निपातनात् गुणः ।) दुर्गपुरम् । इति लिङ्गादिसंग्रहे अमरः ॥

कोट्टवी, स्त्री, दुर्गा । इति त्रिकाण्डशेषः ॥ नग्ना स्त्री । इति शब्दरत्नावली ॥ नग्नमुक्तकेशी नारी ।
"या त्ववासा मुक्तकेशी कोट्टवी नग्निका च सा" ॥
इति जटाधरः ॥ (कोट्टं कुट्टनं छेदनं स्वपुत्रस्येति यावत् वाति हिनस्ति निवारयतीत्यर्थः । यद्वा, कोट्टे कुट्टने संग्रामे स्वसुतस्य रक्षार्थं वाति गच्छतीति । कोट्ट+वा गमनहिंसयोः+कः गौरादित्वात् ङीष् ॥) नग्ना स्त्रीरूपिणी दुर्गा ।
"तन्माता कोट्टवी नाम नग्ना मुक्तशिरोरुहा ।
पुरोऽवतस्थे कृष्णस्य पुत्त्रप्राणरिरक्षया" ॥
इति भागवते । १० । ६३ । २० ॥
(नहीयं स्वयमाद्याशक्तिरूपिणी दुर्गा किन्त्वस्याः लम्बाख्योऽष्टमो भागः । यथा, हरिवंशे बाणकृष्णयुद्धे १८२ अध्याये २२-२३ ।
"व्याविध्यमाने चक्रे तु कृष्णेनाप्रतिमौजसा ।
कुमाररक्षणार्थाय बिभ्रती सुतनुं तदा ॥
दिग्वासा देववचनात् प्रातिष्ठत्तत्र कोट्टवी ॥
लम्बा नाम महाभागा भागो देव्यास्तथाष्टमः ।
चित्राकनकशक्तिस्तु सा च नग्ना स्थितान्तरे" ॥)

कोट्टवीपुरं, स्त्री, (कोट्टव्याः पुरम् ।) बाणपुरम् । इति शब्दरत्नावली ॥

कोट्टारः, पुं, (कुट्ट+आरक्प्रत्ययः । पृषोदरात् साधुः । कोट्टं कोटं दुर्गमित्यर्थः ऋच्छति प्राप्नोति । कोट्ट+ऋ+"कर्म्मण्यण्" । इति अण् ।) नागरः । कूपः । पुष्करिण्याः पाटकः । इति मेदिनी ॥ दुर्गपुरम् । इति लिङ्गादिसंग्रहटीकायां भरतः ॥

कोठः, पुं, (कुठि+अच् निपातनात् नलोपे साधुः ।) चक्राकारकुष्ठरोगः । तत्पर्य्यायः । मण्डलकम् २ । इत्यमरः । २ । ६ । ५४ ॥ दुश्चर्म्मा ३ त्वग्दोषः ४ चर्म्मदूषिका ५ । इति राजनिर्घण्टः ॥ तस्य लक्षणं यथाह माधवकरः ।
"असम्यग्वमनो दीर्णपित्तश्लेष्मान्ननिग्रहैः ।
मण्डलानि सकण्डूनि रागवन्ति बहूनि च ।
उत्कोठः सानुबन्धश्च कोठ इत्यभिधीयते" ॥
अन्यच्च । "वरटीदष्टनिकाशः कण्डूमान् लोहितोऽसकफपित्तात् । क्षणिकोत्पादविनाशः कोठ इति निगद्यते तज्ज्ञैः" ॥ इति रक्षितः ॥
(अस्य चिकित्सा यथा, वैद्यकचक्रपाणिसंग्रहे शीतपित्तोदर्द्दाद्यधिकारे ।
"अग्निमन्थभवं मूलं पिष्टं पीतञ्च सर्पिषा ।
शीतपित्तोदर्द्दकोठान् सप्ताहादेव नाशयेत् ॥
उदर्द्दोक्तां क्रियाञ्चापि कोठरोगे समासतः ।
सर्पिः पीत्वा महातिक्तं कार्य्यं शोणितमोक्षणम्" ॥)

कोठरः, पुं, (कुठ्यते छिद्यतेऽसौ । कुठ+अरप्रत्ययः ।) अङ्कोठवृक्षः । इति राजनिर्घण्टः ॥ आँकोड़ इति भाषा ॥

कोठरपुष्पी, स्त्री, (कोठरस्य पुष्पमिव पुष्पमस्याः । कोठरपुष्प+ङीप् ।) वृद्धदारकः । इति राजनिर्घण्टः ॥ (वृद्धदारकशब्देऽस्या गुणादयो ज्ञातव्याः ॥)

कोणः, पुं, (कुणति वादयत्यनेन कुणति वादयतीति वा । कुण शब्दे+करणे घञ् । कर्त्तरि+अच् वा ।) वीणादिवादनम् । भेरीप्रभृति यन्त्र वाजाइवार काठी इति भाषा ॥ (यथा, रामायणे २ । ७१ । २९ ।
"भेरीमृदङ्गवीणानां कोणसंघट्टितः पुनः" ॥)
अस्त्रादेरग्रभागः । तत्पर्य्यायः । पालिः २ अस्रिः ३ कोटिः ४ । इत्यमरः । २ । ८ । ९३ ॥ (यथा, कादम्बर्य्याम् । "कनक कोणैरभिहन्यमानः" ॥) वाद्यप्रभेदः । गृहादेरेकदेशः । (यथा, कथासरित्सागरे । १९ । ३३ ।
"स्वगृहस्याङ्गने तेन चत्वारः स्वर्णपूरिताः ।
कुम्भाश्चतुर्षु कोणेषु निगूढ़ाः स्थापिता भुवि" ॥)
लगुड़ः । इति मेदिनी । मङ्गलग्रहः । इति हेमचन्द्रः ॥ शनिः । इति विश्वः ॥ द्वयोर्दिशोर्म्मध्यभागः । इति राजनिर्घण्टः ॥ अस्य विवरणं विदिक्शब्दे द्रष्टव्यम् ॥ (कोणमात्रम् । यथा, तन्त्रसारे ।
"विन्दुत्रिकोणवसुकोणदशारयुग्मम्" ॥)

कोणकुणः, पुं, (कोणे मत्कुणैकदेशभागे कुणति विचरतीति । कुण्+अच् ।) उत्कुणः । इति हेमचन्द्रः ॥ उकुण इति भाषा । (मत्कुणम् । छारपोका इति भाषा । खटमल इति हिन्दीभाषा ॥)

कोणिः, त्रि, (कुण+"सर्व्वधातुभ्य इन्" । उणां ४ । ११७ । इति इन् बाहुलकात् गुणः ।) कुणिः । इत्यमरटीका ॥ कोंपा इति भाषा ॥

कोथः, पुं, (कुथ्यते पूतित्वं गम्यते अनेन । कुथ् पूतित्वे+करणे घञ् ।) नेत्ररोगभेदः ; कथो इति भाषा । (कुथ्यति गुदं क्षिणोति । कुथ् कर्त्तरि अच् । गुह्यक्षयकारकभगन्दर रोगविशेषः । यथा, सुश्रुते ।
"मूढ़ेन मांसलुब्धेन यदस्थिशल्यमन्नेन सहाभ्यवहृतं यदावगाढ़पुरीषोन्मिश्रमपानेनाधः प्रेरितं असम्यगागतं गुदं क्षिणोति तत्र क्षतनिमित्तः कोथ उपजायते" । भावे घञ् । गलनम् । यथा, तत्रैव ।
"तस्मिन् क्षते पूयरुधिरावकीर्णमांसकोथे भूमाविव जलसिक्तायां कृमयो जायन्ते" ॥)
शटिते मथिते च त्रि । इति मेदिनीकरहेमचन्द्रौ ॥

कोदण्डं, स्त्री, (कु शब्दे+विच् । कौः शब्दायमानो दण्डोऽस्य ।) धनुः । इत्यमरः । २ । ८ । ८३ ॥ (यथा, भागवते ३ । २१ । ५२ ।
"विस्फूर्ज्जच्चण्डकोदण्डो रथेन त्रासयन्नघान्" ॥)

कोदण्डः, पुं, (कोदण्डं धनुः तत्सदृशमाकारो विद्यते अस्य । अर्श आदित्वादच् ।) भ्रूः । जनपदविशेषः । इति मेदिनी ॥

कोद्रवः, पुं, (कु+विच् । कौः सन् द्रवतीति । द्रु+अच् । द्रवः । कौ द्रव इति कर्म्मधारयः । केन वायुना द्रवति वा पृषोदरात् पूर्व्वस्य ओकारादेशे साधुः ।) धान्यविशेषः । कोदो इति भाषा । तत्पर्य्यायः । कोरदूषः २ । इत्यमरः । २ । ९ । १२ ॥ कुद्रवः ३ । इति तट्टीका ॥ कुद्दालः ४ मदनाग्रकः ५ कोद्रवः ६ कोरदूषकः ७ । इति शब्दरत्नावली ॥